# RAMAKRISHNA MISSION VIDYAMANDIRA
(Residential Autonomous College affiliated to University of Calcutta)

**B.A./B.Sc. THIRD SEMESTER EXAMINATION, DECEMBER 2019**
**SECOND YEAR (BATCH 2018-21)**
**SANSKRIT (Honours)**
**Paper : III**

Date : 11/12/2019
Time : 11 am – 3 pm
Full Marks : 100

## Group - A

१. भवत्पाठ्यग्रन्थानुसारं यथारुचि अलंकार**त्रयस्य** स्वरूपं लक्षणोदाहरणाभ्यां स्पष्टीकर्तव्यम्। [3 × 5]

(क) यमकम्।

(ख) वक्रोक्तिः।

(ग) एकदेशविवर्तिनी उपमा।

(घ) समासोक्तिः।

(ङ) तुल्ययोगिता।

(च) प्रतिवस्तूपमा।

२. यथारुचि अलंकार**युगलद्वयं** चित्वा प्रतियुगलं पारस्परिकं पार्थक्यं यथायुक्ति प्रदर्शनीयम्।

(क) उपमा, उत्प्रेक्षा च।

(ख) काव्यलिङ्गम् अर्थान्तरन्यासः च।

(ग) दृष्टान्तः, निदर्शना च।

(घ) विभावना, विशेषोक्तिश्च।

**अथवा** [2 × 7.5]

यथाभिलाषं पद्य**द्वये** यथायुक्ति अलंकारो निर्णेयः।

(क) नेदं नभोमण्डलमम्बुराशि–
नैताश्च तारा नवफेनभङ्गाः।
नायं शशी कुण्डलितः फणीन्द्रो
नासौ कलङ्कः शयितो मुरारिः।

(ख) पादाहतं यदुत्थाय मूर्धानमधिरोहति।
स्वस्थादेवापमानेऽपि देहिनस्तद् वरं रजः।।

(ग) न तज्जलं यन्न सुचारुपङ्कजं
न पङ्कजं तद् यदलीनषट्पदम्।
न षट्पदोऽसौ न जुगुञ्ज यः कलं
न गुञ्जितं तन्न जहार यन्मनः।।

(घ) बलावलेपादधुनापि पूर्ववत्
प्रबाध्यते तेन जगज्जिगीषुणा।
सती च योषित् प्रकृतिः सुनिश्चला
पुमांसमभ्येति भवान्तरेष्वपि।।

३. यथेच्छमे**एकस्य** प्रश्नस्योत्तरं प्रदेयम्। [1 × 10]

(क) वामनमते कानि तावत् काव्याङ्गानि? तेषु यथेच्छं द्वयम् सप्रपञ्चम् आलोचयत। (2+4+4)

(ख) का नाम रीतिः? सा कतिविधा? रीतिभेदान् समासेन प्रतिपादयत। रीतिषु कस्याः श्रेष्ठत्वं, कस्माच्च हेतोरिति समासेन लिखत। (1+1+6+2)

४. यथेच्छं सूत्र**मेकं** व्याख्यात। [1 × 5]

(क) सौन्दर्यमलङ्कारः।

(ख) न कतकं पङ्कप्रसादनाय।

५. विषय**मेकम्** आश्रित्य टीका रचनीया। [1 × 5]

(क) गद्यम् (ख) अरोचकी कविः

## Group - B

६. **एकः** प्रश्नः समाधेयः। [1 × 10]

(क) व्यसनशब्दस्य का व्युत्पत्तिः? मनुमुनिमतानुसारं क्रोधजव्यसनानां सविशदं परिचयः प्रदेयः। (1+9)

(ख) केन राजा सृष्टः? राज्ञः सृष्टौ किं प्रयोजनम्? केषां देवानां सारांशान् आकृष्य राजा सृष्टः? दैवतांशसम्भूतत्वात् राज्ञः माहात्म्यं लिखत। (1+2+2+5)

७. पद्य**मेकं** सप्रसङ्गं व्याख्येयम्। [1 × 7]

(क) एकमेव दहत्यग्निर्नरं दुरुपसर्पिणम्।
कुलं दहति राजाग्निः सपशुद्रव्यसञ्चयम्।

(ख) वकवच्चिन्तयेदर्थान् सिंहवच्च पराक्रमेत्।
वृकवच्चावलुम्पेत शशवच्च विनिष्पतेत्।।

८. पद्यस्य **एकस्य** वङ्गभाषया वा आङ्गलभाषया वा हिन्दीभाषया अनुवादः कार्यः। [1 × 5]

(क) दूतञ्चैव प्रकुर्वीत सर्वशास्त्रविशारदम्।
इङ्गिताकारचेष्टज्ञं शुचिं दक्षं कुलोद्गम्।।

(ख) अमात्ये दण्ड आयत्तो दण्डे वैनयिकी क्रिया।
नृपतौ कोशराष्ट्रे च दूते सन्धिविपर्ययौ।।

९. एकं विषयमवलम्ब्य **एका** संक्षिप्तटीका विरचनीया । [1 × 3]

(क) शिलोञ्छम्।

(ख) मात्स्यन्यायः।

१०. **एकः** प्रश्नः समाधेयः। [1 × 12]

(क) अमात्यनियोगे कौटिल्यपूर्ववर्तिनाम् आचार्याणां मतजातं भवत्पाठ्यांशानुसारं यथायुक्ति लेख्यम्। किमस्ति तावत् कौटिल्यमतं विषयेऽस्मिन्? (9+3)

(ख) भवत्पाठ्यांशानुसारं त्रय्यां कौटिल्यमतं वैशद्येन लेख्यम्।

११. **<u>एकस्या</u>**नुच्छेदस्य वङ्गभाषया आङ्गलभाषया हिन्दीभाषया वा अनुवादः करणीयः। [1 × 7]

(क) सांख्यं योगो लोकायतं चेत्यान्वीक्षिकी। धर्माधर्मौ त्रय्याम्। अर्थानर्थौ वार्तायाम्। नयापनयौ दण्डनीत्याम्। बलाबले चैतासां हेतुभिरन्वीक्षमाणान्वीक्षिकी लोकस्योपकरोति। व्यसनेऽभ्युदये च बुद्धिमवस्थापयति, प्रज्ञावाक्यक्रियावैशारद्यं च करोति।

(ख) विद्याविनयहेतुरिन्द्रियजयः कामक्रोधलोभमानमदहर्षत्यागात् कार्यः। कर्णत्वगक्षिजिह्वाघ्राणेन्द्रियाणां शब्दस्पर्शरूपरसगन्धेष्वविप्रतिपत्तिरिन्द्रियजयः, शास्त्रार्थानुष्ठानं वा। कृत्स्नं हि शास्त्रमिदमिन्द्रियजयः।

१२. विषयद्वयमवलम्ब्य संक्षिप्तटीका**<u>द्वयं</u>** विरचनीयम्। [2 × 3]

(क) दण्डनीतिः।

(ख) पञ्चाङ्गो मन्त्रः।

(ग) धर्मोपधा।

(घ) श्रीमूला।

——— × ———